# पाठ -४
# वाचां मण्डनं सत्यम्

**सारान्शः**

अस्माभिः कर्णाभ्यां सज्जनानाम् उपदेशाः श्रोतव्याः परैः सह याचनेन स्वीया प्रतिष्ठा नष्टा भवति।ज्ञानमेव जीवनं ,मूर्खता मृत्यु तुल्या अस्ति।अमूल्यं वस्तु तदेव यत् काले प्रदीयते।यदि वयं गोपयित्वा किमपि पापं कुर्मः,तत् पाप मृत्यु काल पर्यन्तं दुःख दायकं भवति।संसारे चत्वारः गुणाः परम् दुर्लभाः सन्ति-सप्रिय वचनं,दानं,निरभिमानं ज्ञानं,क्षमा सहिता वीरता,त्याग युक्तं धनं।संसारे विनम्रता एकः महान् गुणः अस्ति।ऐश्वर्येण सह मनुष्यः उदारोपि भवेत्।हितं,मधुरं च वचनं तद् वक्ता तथा धर्मे संलग्नो जनः संसारं अपि वशीकरोति आलस्यं पर निन्दा च एतौ महान्तौ दुर्गुणौ स्तः।संसारे मनुष्यः विद्यां,धनं,शक्तिं,यशः प्राप्तुं प्रयते।लोभः सर्वगुण नाशकः, वासना सर्व विध रोगाणां मूलं।विनम्रः एव संसारे उन्नतिं साधयति।अभिमानिनः शिरः अन्ते अधः एव भवति असत्य वक्ता स्वीयं विश्वासं जहाति। दानस्य प्रतिदानं नेच्छेत्।स एव मित्रं यः पापान्निवारयेत।मनुष्यस्य आभूषणं तस्य तद् व्यवहारः अस्ति।सत्य परिपूर्णया वाचा एव मनुष्यः सुशोभते।

**मुख्य बिन्दवः**

**(आदिशंकाराचार्यः)**

विश्वविख्यातस्य आदिशंकराचार्यस्य जन्म 788 तमे वर्षे केरलप्रदेशस्य 'कालडी' इति नाम्नि ग्रामे अभवत्। शंकराचार्यस्य पितुः नाम शिवगुरुः मातुश्च नाम सती आसीत् । अष्टवर्षीयः एव सः संन्यासं स्वीकृत्य गुरुगोविन्दपादस्य आज्ञया धर्मविजयम् आरभत। मण्डममिश्रादीन् विदुषः शास्त्रार्थे पराजित्य वेदान्तस्य प्रचारम् कुर्वन् उत्तरे ज्योतिर्मठम्, दक्षिणे शृंगेरीमठं, पूर्वे गोवर्धनपीठम्, पश्चिमे च शारदापीठम् स्थापितम्। तेन अनेके ग्रन्थाः रचिताः येषु ब्रह्मसूत्रभाष्यम्, गीताभाष्यम्, विवेकचूडामणिः प्रश्नोत्तरमालिका इत्यादयः प्रमुखाः सन्ति। द्वात्रिंशत्वर्षीयः एव हिमालयपर्वतस्य केदारनाथस्थले महासमाधौ लीनः अभवत् ।

**अवगच्छामः**

संसारे ज्ञानस्य प्राप्तिः प्रश्नमाध्यमेनैव भवति। यदा कोऽपि प्रश्नः मनसि समायाति तदा वयं तस्य प्रश्नस्य उत्तरं ज्ञातुमिच्छामः । यदा उत्तरं प्राप्यते तदा तस्य उपरि चिन्तनं भवति। "वादे वादे जायते तत्त्वबोधः” इत्यपि कथ्यते । यथा यथा वयं चिन्तनं कुर्मः तथा तथा अस्माकं ज्ञाने वृद्धिः भवति । उपनिषत्सु अपि प्रश्नमाध्यमेन ज्ञानं प्रदत्तम् अस्ति। भगवता आदिशंकराचार्येण अपि, स्वकीये ग्रन्थे 'प्रश्नोत्तरमालिकायाम्' अस्मभ्यं सुन्दरं ज्ञानं दत्तम्।

**आवश्यकोऽयं ज्ञानम्**

**कामः**

सर्वस्य विद्यते प्रान्तो न वांछायाः कदाचन (स्कन्दपुराणे)

आत्मा संयमितो येन तं यमः किं करिष्यति (आश्वालयनस्मृतिः)

कामात् क्रोधोऽभिजायते। (गीता)

**परोपकारः**

उत्तमानां स्वभावोऽपि परदुःखसहिष्णुता (स्कन्द पुराणे 9.1)

आपन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् (मेघ.53)

**अपयशः**

अपमानं हि लोकेडिस्मिन् मरणादपि गर्हितम्

**अविवेकः**

अविवेकः परमापदां पदम्। ( किरात 2.30 )

**उद्यमः**

आत्मैव ह्यात्मनो बन्धुरात्मैवरिपुरात्मनः (गीता 65 )

वृत्तेन हि भवत्याय न धनेन न विद्यया (उद्योग 88.52)

**इन्द्रियनिग्रहः**

वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता। (गीता 2.51)

**व्याकरण बिन्दवः शब्द भण्डाराश्च**

**जश्त्वसन्धिः** तृतीयाक्षरस्य नियमः स्वरपरे वर्गस्य प्रथमाक्षरस्य स्थाने तृतीयः वर्णः भवति। (झलां जशोऽन्ते)यथा-

सत् + उपदेशः-सदुपदेशः त् + उ = दु

**श्चुत्वसन्धिः** - चकारयोगे त् वर्णस्य च् वर्णः भवति । (स्तोः श्चुनाश्चुः)

यथा- तत् + चित्रम् = तच्चित्रम्

**तत्पुरुषः** उत्तरपदप्रधानः भवति ।

द्वितीयाविभक्तितः सप्तमीविभक्तिपर्यन्तं भवति।यथा

ग्रामम् गतः = ग्रामगतः(द्वि. त.)

मुनिना रचितम् = मुनिरचितम् (तृ. त.)

पाकाय शाला = पाकशाला (च. त.)
सिंहात् भयम् सिंहभयम् (पं. त.)
रामस्य चरितम् रामचरितम (ष. त.)
क्रीडायां निपुणः = क्रीडानिपुणः (स.त.)
**नञ् तत्पुरुषः** नञ् (न) पदेन सह समासः 'नञतत्परुषः' कथ्यते ।यथा-
न धर्मः-अधर्मः
न उत्तीर्णः-अनुत्तीर्णः
**बहुव्रीहिः** अन्यपदार्थप्रधानः बहुव्रीहिः कथ्यते ।
यथा- दश आननानि यस्य सः- दशनानः

**शब्दार्थाः**

| | |
|---|---|
| **कर्णाञ्जलिभिः** | कर्णरूपी अञ्जलियों से |
| **गुरुतायाः** | बड़प्पन का |
| **शल्यम** | काँटा |
| **अगर्वम्** | गर्वरहित |
| **गुणविभवे सति** | गुणों की सम्पत्ति होने पर भी |
| **नीतिवृत्ताय** | सदाचारी के लिए |
| **हीयेत** | घटे, क्षीण होवे |
| **अनाकांक्षं** | बदले में कुछ इच्छा किये बिना |

**योग्यतां वर्धयत**

**क्रोधः**
क्रोधाभिभूतः कुरुते हिंसां प्राणविघातिनीम् । क्षमा जयति न क्रोधः । (गरुड पु0 2.34.3) देहोत्पन्नस्तथा क्रोधो देहं दहति दारुणः । (देवीभागवत पु. 4.7.12.)

**उत्साहः**
सोत्साहस्य हि लोकेषु न किंचिपि दुर्लभम्। (वा.रा. 4.1.122)
उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः। (पंच 2.137)
उत्साहवतां शत्रवोऽपि वशीभवन्ति । (चा. नी. 3.16)

**दानम्**
गतिरेकैव वित्तस्य दानम् अन्याः विपत्तयः । (गरुड पु.2.26.63)

**लोभः**
लोभः पापस्य कारणम् । (हितो. 1. 17)
क्लिश्यन्ते लोभमोहिताः । (हि. 1.26)
अकीर्ति लोभं हित्वा सुखी भवेत्। (वनपर्व. 31:3.78)
संभावितस्य चाकीर्तिमरणादतिरिच्यते। (वनप. 300 32 )

**आलस्यम्**
कर्मैव हि कर्तव्यं नास्ति सिद्धिरकर्मणः (महा अ. प. 1026)

**उद्यमः**
दर्लभान्यपि कार्याणि सिध्यन्ति प्रोद्यमेन वै। (बद्धचरितम 26 63)

**शीलम्**
क्षीणोऽपि न त्यजति शीलगुणान् कुलीनः । (चा. मी. 377)
मित्रम् - आपत्सु मित्रं जानीयात् । (गरुड पु. 10.9.8)
धैर्यम्- धीराः कष्टमनुप्राप्य न भवन्ति विषादिनः । (बृहस्पतिनी 4.24)
निसर्गः स हि धीराणां यदापद्यधिकं द्दढाः । (कथासरित् 3.6.31)
सत्यम् सत्यस्य वचनं श्रेयः (शक्ति 329.13)
मनः सत्येन शुध्यति । (मनु. 5.109)
सत्यं कण्ठस्य भूषणम् (सुभा. 9.59)

**पाठ संप्रेष्यः**
प्रश्नमाध्यमेन ज्ञानं वर्धते।
सदाचरणेन, नम्रतया, दानेन, उद्यमेन, सत्येन जनः पूज्यः भवति ।
तत्पुरुषसमासे उत्तरपदप्रधानम् भवति, बहुव्रीहिसमासे च अन्यपदार्थ प्रधानं भवति।
विशेषण- विशेष्यपदयोः उपमान उपमेयपदयोः वा कर्मधारयसमासः भवति ।
म् व्यंजनस्य स्थाने परे व्यंजने सति अनुस्वारः (.) भवति, स्वरात् पूर्व 'म्' व्यंजनं तस्मिन् स्वरे एवं मिश्रितं भवति।
जश्त्व संधौ वर्गीयप्रथमवर्णस्य स्थाने तृतीयः वर्णः भवति।
श्चुत्वसंधौ सकार-तवर्गयोः शकार-चवर्गौ भवतः ।
त्व- तल् भाववाचक प्रत्ययौ ।
विसर्ग स्थाने र, उ, स् भवति ।
स्पृह धातुयोगे चतुर्थी विभक्तिः भवति ।

**अधिकाङ्क्षानाम् अर्जनं कथं भवेत्**
- पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात्। अध्यायस्य समनार्थी पद्य सूक्तयः अपि जानीयात्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां  व्याकरण बिन्दुनां अभ्यासं कुरुत।
- वाक्येषु प्रयुक्तानि तत्पुरुष, कर्मधारय-बहुव्रीहिसमस्तपदानाम् अभ्यासं कुरुत।